# READING - 6

यदा जनकस्य कन्या पर्यणीयत दशरथस्य पुत्रेण तदा साधु साध्वित्यभाष्यत सर्वैः । जनकस्यापरा कन्या पर्यणीयत लक्ष्मणेन । ततो रामेण लक्ष्मणेन च सुखमन्वभूयत । अनन्तरं तौ द्वौ वीरावयोध्यां प्रत्यागच्छताम् । तत्र च सुखमुष्यते ताभ्याम् । कालेन राजा दशरथ आत्मानं जरया पीडितं जानाति । अपि च स स्वस्य ज्येष्ठं पुत्रं रामं राज्ये क्षमममन्यत । अहो वृद्धो ऽस्मि । राज्यं न पुनरिष्यते मया । वनं मया गम्यते तत्र च तपः क्रियते । मम राज्यस्य भारः पुत्रे निक्षिप्यत इति पुनरचिन्तयन्नृपः । तदा रामस्याभिषेकायाज्ञा राज्ञादीयत ॥